तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥
पशुयोनिगता ये च पक्षिकीटसरीसृपाः ।
अथवा वृक्षयोनिस्थास्तेभ्यः पिण्डं ददाम्यहम् ॥
असंख्ययातनासंस्था ये नीता यमशासने ।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥
जात्यन्तरसहस्राणि भ्रमन्तः स्वेन कर्म्मणा ।
मानुष्यं दुर्लभं येषां तेभ्यः पिण्डं ददाम्यहम् ॥
ये बान्धवाबान्धवा वा येऽन्यजन्मनि बान्धवाः ।
ते सर्व्वे तृप्तिमायान्तु पिण्डदानेन सर्व्वदा ॥
ये केचित् प्रेतरूपेण वर्त्तन्ते पितरो मम ।
ते सर्व्वे तृप्तिमायान्तु पिण्डदानेन सर्व्वदा ॥
ये मे पितृकुले जाताः कुले मातुस्तथैव च ।
गुरुश्वशुरबन्धूनां ये चान्ये बान्धवा मृताः ॥
ये मे कुले लुप्तपिण्डाः पुत्त्रदारविवर्जिताः ।
क्रियालोपगता ये च जात्यन्धाः पङ्गवस्तथा ॥
विरूपा आमगर्भा ये ज्ञाताज्ञाताः कुले मम ।
तेषां पिण्डं मया दत्तमक्षय्यमुपतिष्ठताम् ॥
साक्षिणः सन्तु मे देवा ब्रह्मेशानादयस्तथा ।
मया गयां समासाद्य पितॄणां निष्कृतिः कृता ॥
आगतोऽहं गयां देव ! पितृकार्य्ये गदाधर ! ।
तन्मे साक्षी भवत्वाद्य अनृणोऽहमृणत्रयात् ॥"
इति गारुडे गयामाहात्म्ये । ८५-८६ । अध्यायौ ॥

प्रेतशौचं, क्ली, ( प्रेते सति प्रेतस्य वा शौचम् । ) मृतसंस्कारादि । यथा,—
याज्ञवल्क्य उवाच ।
"प्रेतशौचं प्रवक्ष्यामि तच्छृणुध्वं यतव्रताः ।
ऊनद्विवर्षं निखनेन्न कुर्य्यादुदकन्ततः ॥
आश्मशानादनुव्रज्य इतरो ज्ञातिभिर्मृतः ।
यमसूक्तं तथा जप्यं जपद्भिर्लौकिकाग्निना ॥
स दग्धव्य उपेतश्चेदाहिताग्न्यावृतार्थवत् ।
सप्तमाद्दशमाद्वापि ज्ञातयो ह्युपयन्त्यपः ॥
अप नः शोशुचदघमनेन पितृदिङ्मुखाः ।
एवं मातामहाचार्य्यप्रेतानाञ्चोदकक्रियाः ॥
कामोदकाः सखिप्रत्तस्वस्रीयश्वशुरर्त्विजः ।
नामगोत्रेण ह्युदकं सकृत् सिञ्चन्ति वाग्यताः ॥
पाषण्डपतितस्तेना न कुर्य्युरुदकक्रियाम् ।
न ब्रह्मचारिणो व्रात्या योषितः कामगास्तथा ॥
सुरापास्त्वात्मघातिन्यो नाशौचोदकभाजनाः ।
अतो न रोदितव्यं हि त्वनित्या जीवसंस्थितिः ॥
क्रिया कार्य्या यथाशक्ति ततो गच्छेद्गृहान् प्रति ।
विदश्य निम्बपत्राणि नियता द्वारि वेश्मनः ॥
आचम्याथाग्निमुदकं गोमयं गौरसर्षपान् ।
प्रविशेयुः समालभ्य कृत्वाश्मनि पदं शनैः ॥
प्रवेशनादिकं कर्म्म प्रेतसंस्पर्शिनामपि ।
इच्छतां तत्क्षणाच्छुद्धिः परेषां स्नानसंयमात् ॥
क्रीतलब्धाशना भूमौ स्वपेयुस्ते पृथक् पृथक् ।
पिण्डयज्ञावृता देयं प्रेतायान्नं दिनत्रयम् ॥
जलमेकाहमाकाशे स्थाप्यं क्षीरञ्च मृण्मये ।
वैतानौपासनाः कार्य्याः क्रियाश्च श्रुतिचोदिताः ॥
आदन्तजन्मनः सद्य आचूडान्नैशिकी स्मृता ।
त्रिरात्रमाव्रतादेशाद्दशरात्रमतः परम् ॥
त्रिरात्रं दशरात्रं वा शावमाशौचमुच्यते ।
ऊनद्विवर्षे उभयोः सूतकं मातुरेव हि ।
अन्तरा जन्ममरणे शेषाहोभिर्विशुद्ध्यति ॥
दश द्वादश वर्णानां तथा पञ्चदशैव च ।
त्रिंशद्दिनानि च तथा भवति प्रेतसूतकम् ॥
अहस्त्वदत्तकन्यासु बालेषु च विशोधनम् ।
गुर्व्वन्तेवास्यनूचानमातुलश्रोत्रियेषु च ॥
अनौरसेषु पुत्त्रेषु भार्य्यास्वन्यगतासु च ।
निवासराजनि तथा तदहः शुद्धिकारणम् ॥
हतानां नृपगोविप्रैरन्वक्षं चात्मघातिनाम् ।
विषाद्यैश्च हतानाञ्च नाशौचं पृथिवीपते ॥
ऋत्विग्व्रतिब्रह्मचारिदातृब्रह्मविदां तथा ।
दाने विवाहे यज्ञे च संग्रामे देशविप्लवे ।
आपद्यपि हि कष्टायां सद्यःशौचं विधीयते ॥
कालोऽग्निः कर्म्ममृद्वायुर्म्मनो ज्ञानं तपो जलम् ।
पश्चात्तापो निराहारः सर्व्वेषां शुद्धिहेतवः ॥"
इति गारुडे १०६ अध्यायः ॥

प्रेतश्राद्धं, क्ली, (प्रेताय प्रेतोद्देशकं वा श्राद्धम् ।) प्रेतोद्देशकश्राद्धम् । तदनुष्ठानं यथा । तत्र गोभिलः । अथैकोद्दिष्टमेकं पवित्रमेकोऽर्घ एकः पिण्डो नावाहनं नाग्नौकरणं नात्र विश्वेदेवाः स्वदितमिति तृप्तिप्रश्नः । उपतिष्ठतामित्यक्षय्यस्थाने अभिरम्यतामिति विसर्गोऽभिरतोऽस्मीति प्रतिवचनमेतत् प्रेतश्राद्धमिति । इति श्राद्धतत्त्वम् ॥ * ॥ तत्र नवश्राद्धं तत्तु साग्निककर्त्तव्यं चतुर्थपञ्चमनवमैकादशाहेषु प्रेतश्राद्धम् । यथा यमः ।
"चतुर्थे पञ्चमे चैव नवमैकादशे तथा ।
तदत्र दीयते जन्तोस्तन्नवश्राद्धमुच्यते ॥"
इति श्राद्धविवेकः ॥ * ॥
साग्निनिरग्न्युभयकर्त्तव्यं आद्यश्राद्धादिसपिण्डीकरणान्तं श्राद्धम् । यथा,—
"द्वादश प्रतिमास्यानि आद्यं षाण्मासिके तथा ।
सपिण्डीकरणञ्चैव इत्येतत् श्राद्धषोड़शम् ॥"
इति श्राद्धतत्त्वम् ॥ * ॥
अम्बुघटश्राद्धम् । तत्तु संवत्सरं यावत् प्रत्यहं प्रेतोद्देशकान्नजलदानरूपम् । यथा । पारस्करः । अहरहरन्नमस्मै ब्राह्मणायोदकुम्भञ्च दद्यात् पिण्डमप्येके निपृणन्ति । ददतीत्यर्थः । इति श्राद्धविवेकः ॥ * ॥ गयादितीर्थदर्शनादिप्राप्तिनिमित्तमेकोद्दिष्टश्राद्धम् । यथा,—
"पितृयज्ञन्तु निर्व्वर्त्त्य मासिके श्राद्ध एव तु ।
श्राद्धं प्रतिरुचौ चैव मातापित्रोर्म्मृताहनि ॥
असपिण्डीकृतं प्रेतमेकोद्दिष्टेन तर्पयेत् ॥
तेनाम्बुघटश्राद्धे मृताहविहितमासिके तथा विशिष्टतीर्थदर्शनादिप्राप्तौ प्रेतश्राद्धकरणेच्छायां मातापित्रोर्म्मृताहनि च असपिण्डीकृतं प्रेतमेकोद्दिष्टेन तर्पयेत् ।" इति श्राद्धतत्त्वम् ॥

प्रेता, स्त्री, ( प्रेत + स्त्रियां टाप् । ) प्रेतभावापन्ना । यथा । विष्णुरोम् तत् सदित्यादि अमुकगोत्रायाः प्रेताया अमुकीदेव्या अशौचान्ताद्वितीयेऽह्नि अमुकगोत्रायाः प्रेतायाः प्रेतत्वविमुक्तिपूर्व्वकस्वर्गलोकगमनकामः सोपकरणचन्दनाङ्कितधेनुदानमहं करिष्यामि । इति मौखहा ॥ * ॥ मृता । यथा,—
"प्रेतायाः पुत्त्रिकाया न भर्त्ता धनमर्हत्यपुत्त्रायाः ।" इति दायभागे शङ्खलिखितौ ॥

प्रेत्य, व्य, ( प्र + इ + ल्यप् । ) लोकान्तरम् । तत्पर्य्यायः । अमुत्र २ । इत्यमरः । ३ । ४ । ८ ॥
( यथा, मनुः । २ । ९ ।
"श्रुतिस्मृत्युदितं धर्म्ममनुतिष्ठन् हि मानवः ।
इह कीर्त्तिमवाप्नोति प्रेत्य चानुत्तमं सुखम् ॥")

प्रेम, [ न् ] क्ली, पुं, ( प्रियस्य भावः । प्रिय + "पृथ्वादिभ्य इमनिज्वा ।" ५ । १ । १२२ । इति इमनिच् । "प्रियस्थिरेति ।" ६।४।१५७। इति प्रादेशः । प्री तर्पणे + मनिन् वा । ) सौहार्द्दम् । तत्पर्य्यायः । प्रेमा २ प्रियता ३ हार्द्दम् ४ स्नेहः ५ । इत्यमरः । १ । ७ । २७ ॥
( यथा, देवीभागवते । १ । १४ । २४ ।
"दृष्ट्वा व्यासः शुकं प्राप्तं प्रेम्णोत्थाय ससम्भ्रमः ।
आलिलिङ्ग मुहुर्घ्राणं मूर्ध्नि तस्य चकार ह ॥")
नर्म्म । इति मेदिनी । ने, ६४ ॥

प्रेमपातनं, क्ली, (प्रेम्णः स्नेहस्य पातनं यस्मात् । प्रेम्णा पातनं यस्येति वा । ) रोदनम् । नेत्रजलम् । इति शब्दचन्द्रिका ॥

प्रेमभक्तिः, स्त्री, ( प्रेम्णा भक्तिः । ) स्नेहयुक्तश्रीकृष्णसेवा । विष्ण्वैकान्तिकममता । तल्लक्षणं यथा, नारदपञ्चरात्रे ।
"अनन्यममता विष्णौ ममता प्रेमसंप्लुता ।
भक्तिरित्युच्यते भीष्म ! प्रह्लादोद्धवनारदैरिति ॥
प्रेमभक्तेश्च माहात्म्यं भक्तेर्म्माहात्म्यतः परम् ।
सिद्धमेव यतो भक्तेः फलं प्रेमैव निश्चितम् ॥" * ॥
अथ प्रेमसम्पत्तिचिह्नानि यथा, भागवते ७ स्कन्धे ७ अध्याये श्रीप्रह्लादस्य बालानुशासने ।
"निशम्य कर्म्माणि गुणानतुल्यान्
वीर्य्याणि लीलातनुभिः कृतानि ।
यदातिहर्षोत्पुलकाश्रुगद्गदं
प्रोत्कण्ठ उद्गायति रौति नृत्यति ॥
यदा ग्रहग्रस्त इव क्वचिद्धस-
त्याक्रन्दते ध्यायति वन्दते जनम् ।
मुहुः श्वसन् वक्ति हरे जगत्पते
नारायणेत्यात्ममतिर्गतत्रपः ॥
तदा पुमान् मुक्तसमस्तबन्धन-
स्तद्भावभावानुकृताशयाकृतिः ।
निर्दग्धबीजानुशयो महीयसा
भक्तिप्रयोगेण समेत्यधोक्षजम् ॥"
इति श्रीहरिभक्तिविलासे ११ विलासः ॥

प्रेमा, [ न् ] पुं, (प्रिय + इमनिच् । प्री तर्पणे + मनिन् वा ।) स्नेहः । इत्यमरः । १ । ७ । २७ ॥ अस्य लक्षणं यथा,—
"सर्व्वथा ध्वंसरहितं सत्यपि ध्वंसकारणे ।
यद्भावबन्धनं यूनोः स प्रेमा परिकीर्त्तितः ॥"
इत्युज्ज्वलनीलमणिः ॥
वासवः । वायुः । इति मेदिनी । ने, ६४ ॥